# INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SOCIOLOGY & HUMANITIES

**ISSN 2277 – 9809 (online)**
**ISSN 2348 - 9359 (Print)**

*An Internationally Indexed Peer Reviewed & Refereed Journal*

www.IRJMSH.com
www.isarasolutions.com

Published by iSaRa Solutions

# ऊहलक्षणम् तत्समन्वयसहितम् प्रदर्शिन्युपोद्बलितम्

**Dr. C. Hariharan,**
The Madras Sanskrit College

**मीमांसायाम् ऊहः**

प्रकृतिदृष्टस्य पदार्थस्य विकृतौ अन्यथाभावः ऊहः इति आपाततः प्राचीनैः उक्तमस्ति। तदत्र खण्डदेवाचार्यैः भाट्टदीपिकायां परिष्कृत्य निरुक्तम्। परिष्कृत्य निर्वचने सति स्पष्टावबोधः भवति। तावता प्राचीनोक्तं दुष्टमिति नार्थः। किन्तु प्राचीनैः उक्तान्येव लक्षणानि स्वीकृत्य स्पष्टतया निर्वचने सति अन्यत्र अतिव्याप्त्यादि वारयितुं शक्यते। तदत्र भाट्टदीपिकारीत्या खण्डदेवोक्तं ऊहलक्षणमाश्रित्य अयं प्रबन्धः विरच्यते। पूर्वमीमांसायाम् ऊहश्च नवमाध्यायस्य विषयः।

**ऊहशब्दार्थः लोके**

ऊह=वितर्के धातोः घप्रत्ययतः निष्पन्नः ओओहः इति शब्दः लोके अनुमानार्थे वा अर्थापत्यर्थे वा उपयुज्यते। यथा देवदत्तः वाहनदर्शनेन यज्ञदत्तस्य आगमनं ऊहते इत्यत्र अनुमिमीते इत्यर्थे ऊहशब्दप्रयोगः। वा यज्ञदत्तः देवदत्तस्य गृहे अदर्शनेन बहिर्गमनम् ऊहितवान् इत्यत्र अर्थापत्त्या कल्पितवान् इत्यर्थे ऊहशब्दः प्रयुज्यते। [1]अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः। इय्यमरकोशेपि ऊहशब्दः अस्मिन्नेवार्थे क्रोडीकृतः दृश्यते। अन्यत्रापि असमवेतार्थकपदत्यागपूर्व्वकसमवेतार्थकपदसमभिव्याहारकरणम् । इति श्राद्धतत्त्वटीका ॥ साकाङ्क्षवाक्यस्य पदान्तरेण आकाङ्क्षापूरणम् ॥ (ऊहनम् । आरोपः । यथा, महाभारते १३ । उमामहेश्वरसंवादे १४५ । ४३ ॥ “इमे मनुष्या दृश्यन्ते ऊहापोहविशारदाः । ज्ञानविज्ञानसम्पन्नाः प्रजावन्तोऽथ कोविदाः” ॥ परीक्षणम् । सिद्धिभेदः ॥) इत्युक्तम् ।

[1] अमरकोशस्य धीवर्गे (१.५.३२२)

ज्योतिश्शास्त्रे ऊहशब्दार्थः

ज्योतिषशास्त्रे प्रतिभा इत्यर्थे ऊहशब्दः प्रयुक्तः दृश्यते । "ऊहापोहपटुः सिद्धमन्त्रो जानाति जातकम्" । इति अनेकहोराग्रन्थतत्वज्ञः पञ्चसिद्धान्तेष्वपि कोविदः सिद्धमन्त्रोऽपि यः अस्ति सः ऊहापोहपटुत्वेन जातकं ज्ञातुं समर्थो भवतीत्यर्थः । अस्मिन् स्थले प्रतिभा इत्यर्थे ऊहशब्दप्रयोगः कृतो वर्तते। एवमेव लोके अपि अस्मिन्नेव प्रतिभा इत्यर्थे ऊहशब्दप्रयोगः वर्तते इति वयं पश्यामः।

व्याकरणे मीमांसायाञ्च ऊहशब्दार्थः

**"[2]रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"** इति व्याकरणशास्त्रस्य प्रयोजनं विवृण्वता भगवता महाभाष्यकर्त्रा पतञ्जलिना उक्तं पस्पशाह्निके। तत्राप्यूहशब्दार्थं विवृण्वन् भगवान् अग्रे वक्ति, **"ऊहः खल्वपि। न सर्वैर्लिङ्गैः न च सर्वाभिः विभक्तिभिः वेदे मन्त्राः निगदिताः। ते चावश्यं यज्ञगतेन यथार्थं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति यथार्थं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्।"** इति ।

वेदे "देवस्यत्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् अग्नये जुष्टं निर्वपामि" इति मन्त्रः प्रकृतियागे विहितः। प्रकृतियागो नाम यत्र समग्राङ्गोपदेशः भवति । विकृतियागः नाम यत्र समग्राङ्गोपदेशः नास्ति किन्तु प्रकृतितः अङ्गानि अतिदिश्यन्ते सः यागः। उपर्युक्तः देवस्यत्वा इति मन्त्रः प्रकृतियागे वर्तते इत्युक्तम् । स च यागः अग्निदेवताकः। विकृतियागः सूर्यदेवताकः इति चिन्तयामः तत्र "देवस्यत्वा" इति मन्त्रः तथैव न प्रयोक्तव्यः विकृतियागस्य अग्नितेवताकत्वाभावात्। यतो हि अस्मिन् मन्त्रे "अग्नये" इति चतुर्थीविभक्त्यन्तः शब्दः वर्तते। अतः विकृतौ "सूर्याय" इति शब्दान्तरं परिवर्त्य मन्त्रप्रयोगः कर्तव्यः भवति। एतादृशं परिवर्तनं असन्दिग्धं कर्तव्यञ्चेत् व्याकरनज्ञानेन भवितव्यम् इति। इदमेव च व्याकरणशास्त्राध्ययनस्य प्रयोजनान्यतमम् इति उच्यते वैयाकरणैः इति अस्य महाभाष्यांशस्य सारः। तदयं शब्दान्तरपरिवर्तनं यत् क्रियते सः ऊहशब्दार्थः मीमांसायाम् । स एव च महाभाष्ये अनूदितः।

---

[2] व्याकरण महाभाष्यस्य पस्पशाह्निके शास्त्र प्रयोजनाधिकरणे प्रथमाध्यायस्थ-प्रथमपादे आद्ये अधिकरणे।

किन्तु इदमस्माभिः मनसि धर्तव्यं यत् महाभाष्ये अनूदितः केवलं मन्त्रोहः एव। अत्र तु यागे सामोहः, सांस्करोहः इति प्रभेदद्वयमपि वर्तते। तत्र तु व्याकरणाध्ययनस्य अपेक्षा नास्ति। तदादौ नवमाध्यायस्य प्रथमे पादे आद्यमधिकरणं भवति ऊहलक्षणाधिकरणं तदादाय लक्षणं पश्यामः चेत्, ....

लक्षणम्

"यस्य पदार्थस्य येन सम्बन्धेन यद्धर्मावच्छिन्न वृत्तित्वं पकृतौ श्रुतं तस्य तेनैवसंबन्धेन विकृतौ तद्धर्मावच्छिन्नभिन्न वृत्तित्वं ऊहः"

**समन्वयः**

(ऊहस्य त्रैविद्ध्यात् त्रिविधे अपि ऊहे समन्वयः कार्यः)

**1. मन्त्रोहे** यथा "देवस्यत्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याम् अग्नये जुष्टं निर्वपामि" इति मन्त्रः यत्पदेन स्वीकार्यः। तथा च यस्यपदार्थस्य = देवस्यत्वेति मन्त्रस्य, येन संबन्धेन = स्मार्यत्वसंबन्धेन यद्धर्मावच्छिन्नन्व्रुत्तित्वं = अग्नित्वधर्मावच्छिन्न-अग्निदेवतावृत्तित्वम् प्रकृतौ श्रुतम्, तस्यपदार्थस्य = निरुक्तमन्त्रस्य, तेनैव सम्बन्धेन = स्मार्यत्वेनैवसंबन्देन, तद्धर्मावच्चिन्न भिन्न वृत्तित्वम् = अग्नित्वधर्मावच्छिन्न-भिन्न-सूर्यदेवतावृत्तित्वम् इति समन्वयः।

**2. सम्स्कारोहे** यथा (व्रीहिद्रव्यकाग्नेययागविकृभूत-नीवारचरुद्रव्यक-विकृतियागं स्वीकृत्य आलोचयामः) "ब्रीहीन्प्रोक्षति" इतिवाक्यविहितं प्रोक्षणं यत्पदग्राह्यम् । यस्यपदार्थस्य = प्रोक्षणस्य येनसंबन्धेन = संस्कार्यत्वसंबन्धेन, यद्धर्मावच्छिन्नवृत्तित्वं = व्रीहित्वधर्मावच्छिन्न- ब्रीहिवृत्तित्वं प्रक्रुतौ श्रुतम्, तस्यपदार्थस्य = प्रोक्षणस्य, तेनैव सम्वन्धेन संस्कार्यत्वेनैव संबन्धेन, तद्धर्मावच्छिन्न-भिन्नवृत्तित्वम् = व्रीहित्वधर्मावच्छिन्न-भिन्न-श्यामाकवृत्तित्वम् अस्तीति समन्वयः।

**3. सामोहे** यथा "अग्ने" इत्यत्र यः एकारस्य "आई" भावः तस्य यत्पदग्राह्यत्वेन ऊहितत्वं उत्क्त्वा समन्वयः कार्यः। (कुत्वा चिन्ता) अत्र च "अग्ने" ऋचः आरम्भः इति चिन्तयामः चेत् द्वितीयस्थाने आई भावः प्रकृतौ । तथैव यत्र विकृतौ एकारः तत्र आईभावस्य क्रियमाणत्वात् ऊहः इति। यथा यस्यपदार्थस्य = आईभावस्य, येनसम्बन्धेन = वर्ण-अभिव्यङ्ग्यत्व सम्बन्धेन

यद्धर्मावच्छिन्नवृत्तित्वं = द्वितीयस्थानगत आईभाववृत्तित्वं प्रवृत्तौ श्रुतं, तस्यपदार्थस्य = आईभावस्य, तेनैव संबन्धेन = वर्णाभिव्यङ्ग्यत्वेनैव सम्बन्धेन, तद्धर्मावच्छिन्नभिन्न वृत्तित्वम् द्वितीयस्थानत्वावच्छिन्न भिन्न चतुर्थस्थानवृत्तित्वं अस्तीति समन्वयः।

**दलप्रयोजनम्**

**> संबन्धैक्यस्य**

लक्षण घटक "येनसंबन्धेन, तेनसंबन्धेन' इति दलानुपादाने (संबन्धैक्य अविवक्षायाम्) विकृतिविशेषभूतसौत्रामणियग्गङ्गभूत पशुपुरोडाशयागीय उद्देशांशे अतिव्याप्तिः। प्रकृतौ हि यद्देवत्यःपशुः तद्देवत्यः पुरोडाशः इति न्यायेन पशुपुरोडाशयागोद्देशांशः स्मार्यत्व संबन्धेन प्रधानयागीयदे वतावृत्तितितया सन्निपत्योपकारकः आसीत् । सौत्रामणियागे तु पशुपु रोडाशयागस्य वचनबलेन भिन्नदेवताकत्वात् अदृष्तद्वारकसंबन्धेन आरादुपकारकत्वम् । तस्मात् संबन्धैक्कां निवेशनीयम् ।

**> प्रकृतिविकृति दलस्य**

लक्षणे "प्रकृत्तौ" "विकृतौ" इति दलद्वय अनुपादाने "येन संबन्धेन यद्धर्मावच्छिन्न बुत्तित्वम् दृश्टं, तेनै वसंबन्धे नतद्धर्मा वच्छिन्न भिन्न वृत्तित्वम्" इति लक्षणं शिष्यते। तथा चेत्, प्रकृत्तौ एव यवगत प्रोक्षणे लक्षणस्य अतिव्याप्तिः। तत्र हि संस्कार्यत्व सम्बन्धेन ब्रीहित्वधर्मा वच्छिन्नवृत्तितया दृष्टस्य प्रोक्षणस्य सम्स्कार्यत्वेनैवसम्बन्धेन व्रीहित्वधर्मावच्छिन्न भिन्न यववृत्तितया ऊहितत्वं स्यात् । अतः तद्वारणाय प्रकृति विकृति दलम् । इदानींनातिव्याप्तिः, यद्यपि प्रोक्षणं तुल्यसंबन्धेनव्रीत्वावच्छिन्नभिन्नयवगतं, तथापि विकृतिगतं न इति अतिव्याप्तिवारणम् ।

**> धर्मावच्छिन्नत्व दलस्य**

लक्षणघटक वृत्तित्वे धर्मावच्छिन्नत्व पर्यन्तं कुतो विशेषणं वक्तव्यम्? "यस्य पदार्थस्य येनसम्बन्धेन यद्वृत्तित्वं प्रकृतौ दृष्टं तस्य तेनसम्बन्धेन विकृतौ तद्भिन्न वृत्तित्वं ऊहः" इत्येवोच्यताम् ! इति चेन्न। विकृतिभूत सौर्ययगीय ब्रीहीणां प्रकृतिभूत दर्शपूर्णमसीय ब्रीहिभेदः तद्व्यक्तित्वेन उपपद्यते एव। तथा च विकृभूत सौर्ययागीय व्रीहिगतप्रोक्षणे (आतिदेशिके) ऊहितत्वं स्यात् इति निरुक्त प्रोक्षणे ऊहलक्षणस्य अतिव्याप्तिः। अतः लक्षणघटक वृत्तित्वे धर्मावच्छिन्नत्वं निवेशनीयम् । वारणन्तु एवं, यद्यपि सौर्ययागीय व्रीहयः तद्यक्तित्वेन

प्राकृतव्रीहिभिन्नाः तथापि ब्रीहित्वावच्छिन्नप्रतियोगिताक भेदवन्तो न इति तद्धर्मावच्छिन्न भिन्न वृत्तित्वं न सम्भवतीति नातिव्याप्तिः। यत्र तु यवसाध्य विकृतिः तद्गतप्रोक्षणे ऊहितत्वं इष्टमेव।

ननु प्रकृतौ ब्रीद्युद्देशेन प्रोक्षणे विधीयमाने उद्देश्यतावच्छेदकं व्रीहित्वम् न तथा चेत् यैवेषुप्रोक्षणं न भवेत् अतः अपूर्वसाधनत्वमेवइत्युक्तम्। ताद्रुश अपूर्वसाधनवृत्तितया एव प्रोक्षणस्य श्रुतत्वेन वैकृत श्यामाके अपि अपूर्व साधनत्वस्य सत्वेन अपूर्वसाधनत्वावच्छिन्नभेदस्य असत्वेन च कथं तद्धर्मावच्छिन्नभिन्नवृत्तित्वं उपपद्यते ? (तथा च असम्भवः इति सारः) । यदि तु प्रवृत्तौ दर्श पूर्ण मासत्वदिना अपूर्वं भिद्यते इति दर्शपूर्णमासापूर्व साधनवृत्तितयाएव प्रोक्षणं श्रुतं तद्भेदस्तु वैकृत श्यामाक चरौ अस्त्येव इति साध्यते, तर्हि तादृश भेदस्य सौर्य यागीय व्रीहिषु अपि सत्वेन तत्र क्रियमाणे आतिदेशिके प्रोक्षणे अतिव्याप्तिः इति चेत्, उच्यते अत एव लक्षणस्थं श्रुतपदं "तात्पर्य मनपेक्ष्य प्रतीयमानं" इत्यर्थकम् इति।

✓ **निष्कृष्टं लक्षणम्**

> "[3]यस्य पदार्थस्य येन सम्बन्धेन यद्धर्मावच्छिन्नवृत्तित्वं प्रकृतौ तात्पर्यमनपेक्ष्य प्रतीतं तस्य पदार्थस्य तेनैव सम्बन्धेन विवृत्तौ तद्धर्मावच्छिन्न भिन्नवृत्तित्वं ऊहः" इति।

**श्रुतम् = तात्पर्यमनपेक्ष्य प्रतीतम्**

अत्र च निष्कृष्टलक्षणे "तात्पर्यमनपेक्ष्य प्रतीतम्" इति दत्तं वर्तते। समन्वयावसरे तु "श्रुतम्" इत्येव उक्तमासीत्। तदिदानीं विविच्यते। देवस्यत्वा इति मन्त्रघटकेन अग्निशब्देनैव विकृतौ सूर्यदेवताकयागे लक्षणया सूर्यदेवतास्मरणं कुतः न भवेत् इति कश्चन शङ्कितुं शक्नोति। तत्समाधानमुच्यते अग्न्यादिः मन्त्रगतशब्दः मुख्यया एव वृत्त्या अग्निदेवातां प्रकाशयति स्म प्रकृतौ विकृतौ तु तेनैव शब्देन सूराख्यस्य देवताविशेषस्य प्रकाशनं कर्तव्यञ्चेत् लक्षणया कर्तव्यम्। तच्च न स्वीक्रियते।

[3] भाट्टदीपिकायां नवमे अध्याये 9-1-1

**लक्षण समन्वय सारणी**

| लक्षणम् | **मन्त्रोहे समन्वयः** | **सामोहे समन्वयः** | **संस्कारोहे समन्वयः** |
|---|---|---|---|
| **यस्यपदार्थस्य** | 'देवस्येत्वा' इति मन्त्रस्य | अईभावस्य | प्रोक्षणस्य |
| **येनसम्बन्धेन** | स्मार्यत्वसम्बन्धेन | वर्णाभिव्यन्यत्वसम्बन्धेन | संस्कार्यत्वसम्बन्धेन |
| **यद्धर्मावच्छिन्नवृत्तित्वम्** | अग्नित्वावच्छिन्न वृत्तित्वं | द्वितीय एकार वृत्तित्वं | व्रीहित्वावच्छिन्न वृत्तित्वं |
| **प्रवृत्तौ श्रुतम्, तद्धर्मावच्छिन्नस्य** | 'देवस्यत्वा' इति मन्त्रस्य | अईभावस्य | प्रोक्षणस्य |
| **तेनैवसम्बन्धेन** | स्मार्यत्वेनैवसम्बन्धेन | वर्णाभिव्यन्ङ्ग्यत्वसम्बन्धेन | संस्कार्यत्वसम्बन्धेन् |
| **तद्धर्मावच्छिन्न भिन्न वृत्तित्वम्** | अग्नित्वावच्छिन्न भिन्न सूर्य वृत्तित्वम् | द्वितीयत्वावच्छिन्न भिन्न चतुर्थ वृत्तित्वम् | व्रीहित्वावच्छिन्न भिन्न श्यामाकवृत्तित्वम् |

**ऊहः इति लक्षण समन्वयः ॥**

**References:**

**Amarakośa**
**https://sanskritdocuments.org/doc_z_misc_major_works/amarfin1.html**

**Vyakarana Mahabhashyam Published by Chowkhamba Surabharati Paristhan (2004 edition)**

**भाट्टदीपिका of Khandadeva published by Rashtriya Sanskrit Samsthan (1st edition)**

# ISARA INSTITUTE OF MANAGEMENT & PROFESSIONAL STUDIES




RSEARCH GATEWAY







AROGYAM ONLINE

# PARIVARTAN PSYCHOLOGY CENTER






भारतीय भाषा, शिक्षा, साहित्य एवं शोध
ISSN 2321 – 9726
WWW.BHARTIYASHODH.COM

INTERNATIONAL RESEARCH JOURNAL OF
MANAGEMENT SCIENCE & TECHNOLOGY
ISSN – 2250 – 1959 (0) 2348 – 9367 (P)
WWW.IRJMST.COM

INTERNATIONAL RESEARCH JOURNAL OF
COMMERCE, ARTS AND SCIENCE
ISSN 2319 – 9202
WWW.CASIRJ.COM

INTERNATIONAL RESEARCH JOURNAL OF
MANAGEMENT SOCIOLOGY & HUMANITIES
ISSN 2277 – 9809 (0) 2348 - 9359 (P)
WWW.IRJMSH.COM

INTERNATIONAL RESEARCH JOURNAL OF SCIENCE
ENGINEERING AND TECHNOLOGY
ISSN 2454-3195 (online)

WWW.RJSET.COM

INTEGRATED RESEARCH JOURNAL OF
MANAGEMENT, SCIENCE AND INNOVATION
ISSN 2582-5445

WWW.IRJMSI.COM

JOURNAL OF LEGAL STUDIES,POLITICS
AND ECONOMICS RESEARCH

WWW.JLPER.COM